# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा- शास्त्री | प्रश्नपत्रम् – ०६ | गुणाः – ७० |
| विषयः – साहित्यम् | सत्रम्- (२ ) | समयः- ०३ त: ०६ |
| दिनाङ्कः – ०१/०४/२०२० | सन्दर्भग्रन्थः – शिशुपालवधम् – सर्ग: २ | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधोलिखितेषु कयोश्चिद् द्वयो: ससन्दर्भं व्याख्यां कुरुत।** १०

१ मम तावन्मतमिदं श्रूयतामङ्ग वामपि।
ज्ञातसारोऽपि खल्वेक: सन्दिग्धं कार्यवस्तुनि॥

२ विरोधिवचसो मूकान् वागीशानपि कुर्वते।
जडानप्युलोमार्थान् प्रवाच: कृतिनां गिर:॥

३ मन्त्रो योध इवाधीर: सर्वाङ्गै: संवृतैरपि।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया॥

**प्रश्न २ महाकवेर्माघस्य जीवनवृत्तं काव्यनिर्माणवैशिष्ट्यञ्च सयुक्तिकं प्रतिपाद्यताम् ।** १०

**अथवा**

**“माघे सन्ति त्रयो गुणा:” भणितेरस्या: सार्थकत्वं सयुक्तिकं समुपादयत ।**

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधोलिखितेषु कयोश्चिद् द्वयो: ससन्दर्भं व्याख्यां कुरुत।** १०

१ तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत्।
हिमांशुमाशु ग्रसते तन्म्रदिम्न: स्फुटं फलम्॥

२ यजतां पाण्डव: स्वर्गमवत्त्विन्द्रस्तपत्विन:।
वयं हनाम द्विषत: सर्व: स्वार्थं समीहते॥

३ निशम्य ता: शेषगवीरभिधातुमधोक्षज:।
शिष्याय बृहतां पत्यु: प्रस्तावमादिशद् दृशा॥

**प्रश्न ४ शिशुपालवधमहाकाव्यस्य श्रीकृष्णस्य चरित्रचित्रणं माघमतानुसारं विधीयताम्।** १०

**अथवा**

**शिशुपालवधमहाकाव्यदिशा उद्धवस्य चरित्रचित्रणं विधीयताम् ।**

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोलिखितेषु कयोश्चिद् द्वयो: ससन्दर्भं व्याख्यां कुरुत ।** **१०**

१ सोपधानां धियं धीरा: स्थेयसीं खट्वयन्ति ये ।
तत्रानिशं निषण्णास्ते जानते जातु न श्रमम् ॥

२ तेज: क्षमा वा नैकान्तं कालज्ञस्य महीपते: ।
नैकमोज: प्रसादो वा रसभावविद: कवे: ॥

३ तीक्ष्णा नारुन्तुदा बुद्धि: कर्म शान्तं प्रतापवत् ।
नोपतापि मन: सोष्म वागेका वाग्मिन: सत: ॥

**प्रश्न ६ शिशुपालवधस्य द्वितीयसर्गस्य कथा सङ्क्षेपेण स्वसंस्कृतेन लेख्या ।** **१०**

**अथवा**

**शिशुपालवधस्य द्वितीयसर्गमधिकृत्य बलरामवर्णितं राजनीतिप्रकारं विशदं निरूपयत ।**

## संयुक्तान्वितय: (Unit 1-3)

**प्रश्न ७ दशानां प्रश्नानां लघूत्तराणि लिखत ।** **१०**

१ शिशुपालवधस्यापरं नाम किमस्ति ?
२ शिशुपालवधस्याधारग्रन्थ: क: ?
३ शिशुपालवधस्य रचयिता क: ?
४ शिशुपालवधस्याङ्गी रस: कोऽस्ति ?
५ शिधुपालवधे कति सर्गा: सन्ति ?
६ माघे त्रयो गुणा: के सन्ति ?
७ महाकवे: माघस्य पितु: नाम किमस्ति ?
८ द्वितीयसर्गे कति जना: मन्त्रणां कुर्वन्ति ?
९ द्वितीयसर्गे कति श्लोका:सन्ति ?
१० यज्ञार्थं क: आमन्त्रणं प्रेषितवान् ?
११ शिशुपालवधस्य वर्ण्यवस्तु ऐतिहासिकं काल्पनिकं वा ?
१२ माघस्य समय: कदा निर्धारितोऽस्ति ?
१३ शिशुपालावधस्य नायक: क: ?
१४ कीदृश: श्रीकृष्ण: सद: (सभाम्) आसादत् ?
१५ श्रीकृष्णस्य सारथे: किं नाम आसीत् ?

**************************